# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीयपरीक्षा - प्रथमपत्रिका

**दिनाङ्क: - २५.०८.२०१९** **पूर्वाह्ण: १०.००त: १.००पर्यन्तम्**

**समय: - होरात्रयम्** **अङ्का: -१००**

**1. पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत।** **5**

१. वायसस्य नाम किम् ?

२. पञ्चतन्त्रं केन प्रणीतम् ?

३. तारकेण विप्रकृता: देवा: कुत्र ययु: ?

४. कृतमुपकारं के न विस्मरन्ति ?

५. कालटिग्राम: कुत्रास्ति ?

६. मल्ल: कस्य सभायामाससाद ?

७. धर्मव्याध: कुत्र न्यवसत् ?

**2. षण्णां द्वित्रै: वाक्यै: उत्तरं लिखत।** **12**

१. कौशिक: कीदृशो द्विज: आसीत् ?

२. द्रोणाचार्य: क: ? तस्य प्रसिद्ध शिष्य: क: ?

३. नव गोप्यानि कानि ?

४. गणेशं के कदा नमस्कुर्वति ?

५. मानवेन नित्यं किमालोचनीयम् ?

६. नयशास्त्रकर्तार: के ?

७. सीता कुत्र कथम् अवर्तत ?

८. भूतानां प्रलयेदयौ कौ ?

**3. त्रयाणां पञ्चषै: वाक्यै: संस्कृतेन उत्तरं लिखत।** **9**

१. वायसेन किमनिष्टं दृष्टम् ? तत्परिणामं लिखत।

२. विष्णुशर्मण: प्रतिज्ञा का ?

३. हनूमान् समुद्रस्योपरि किं किं चकार ?

४. केषां मति: क्षीयते ?

५. ब्राह्मणपुत्र: दीनारकं दृष्ट्वा किं चिन्तितवान् ?

Scanned by CamScanner

**4. चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 16

१. भोजेन किमर्थं समस्या दत्ता ? केन समस्या पूरिता।

२. "आसहारशुद्धौ सत्त्वशुद्धिः" - विशदयत।

३. कौशिकः गृहिण्याः गृहे किमर्थं क्रोधितः अभवत्?

४. श्रीशङ्करभगवत्पादाचार्यस्य जीवनम् ।

५. ब्राह्मण-सर्प-वृत्तान्तम् ।

**5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** 12

१. " अकार्य कृतवानस्मि "।

२. " मृताजातौ सुतौ वरम् "।

३. " भार्या भव मम इति बहुधा समयाचत "।

४. " केवलं जगति तेऽपि राक्षसाः "।

५. " सर्पेण युक्तमेव कृतम् "।

६. " तदनन्तरं यद्भावि तद्भवतु "।

**6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** 4

१. न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम्।
यदि कार्यविपत्तिः स्यात् मुखरस्तत्र हन्यते॥

२. मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ॥

३. रविनिशाकरयोर्ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनम्।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः॥

**7. श्लोकद्वयं पूरयत ।** 4

१. पौलस्त्यः ------------- क्षीयते ।

२. प्रथमवयसि------------- विस्मरन्ति ।

३. जयन्ति ---------- भयम्।

**8. गद्यस्य अस्य अनुवादं कुरुत ।** 4

एकदा द्रोणस्याज्ञया कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन्। तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितम् एकलव्यं दृष्ट्वा अभषत्। अनुपदमेव स भषतश्शुनो मुखे सप्तशरानपूरयत्। सः श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत्।

**9. रिक्तस्थानानि पूरयत ।** 4

१. न पराभवमाप्नोति-----------------कदाचन ।

२. सेयं नतिः ---------------- ।

३. हस्ते किं ते ? -------- ।

४. तेन मन्त्रेण --------- भविष्यसि।

Scanned by CamScanner

**10.** **त्रयाणां पर्यायपदानि लिखत।** 3

१. भूमि: २. संवत्सर: ३. कण्ठ: ४. अनुपदम्

**11.** **त्रयाणां विरुद्धपदानि लिखत।** 3

१. बन्धनम् २. प्रकाश: ३. आद्याय ४. सुरा:

**12.** **वाक्यदोषं परिहरत।** 3

१. भवान् गच्छ। २. ग्रामस्य समया उपवनम् अस्ति।

३. वायसस्य सह मूषक: गत:।

**13.** **त्रीणि पदानि संस्कृतवाक्येषु योजयत।** 3

१. अयाचत २. प्राक् ३. नम:

**14.** **एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत।** 3

१. अयाचत २. वेद ३. क्षीयते

**15.** **सन्धिं विभज्य सन्धिनाम लिखत।** 3

१. मरुद्ग्रामम् २. तैरुक्तम् ३. इत्येनाम्

**16.** **लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत (द्वे एव)।** 4

१. यादृशं --------------- तादृशी। २. स्निग्ध---------------भवति

३. न्याय्यात् ------------ धीरा:।

**17.** **संयोज्य लिखत।** 4

| **अ** | **आ** |
|---|---|
| १. बाल इति | यण्सन्धि: |
| २. गौस्तत्र | रेफादेश: |
| ३. मुनिरिति | सकारागम: |
| ४. रामोऽपि | उकारादेश: |
| | विसर्गलोप: |

**18.** **प्रयोगं परिवर्तयत।** 4

१. बालका: मधुरं खादन्ति। २. नाहं विद्याविक्रयं करोमि।

३. बालिकया पत्रं लिख्यते। ४. विष्णुशर्मणा राजपुत्रा: पाठिता:।

--------------------

Scanned by CamScanner

**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीयपरीक्षा – द्वितीयपत्रिका**

**दिनाङ्कः - २५.०८.२०१९** **अपराह्णः १.३०तः ३.०० पर्यन्तम्**

**समयः - सार्धैकहोरा** **अङ्काः ५०**

1. **एकं विषयमधिकृत्य दशभिः वाक्यैः संस्कृतभाषायां प्रबन्धमेकं लिखत।** 5

१. उद्यानम् २. पुस्तकभण्डारः ३. गजः

2. **एकं विषयमधिकृत्य संस्कृतभाषायां पत्रमेकं लिखत।** 5

१. प्रवासार्थं धनप्रेषणाय पितरं प्रति प्रार्थना।

२. अनारोग्यनिमित्तं विरामपत्रम्।

3. **द्वयोः लक्षणं सोदाहरणं मातृभाषया लिखत।** 6

१. भूतकालः २. प्रयोगाः ३. उपसर्गाः

4. **वाक्यदोषान् समीकुरुत।** 3

१. अजः वृकेण त्रस्यति। २. कपिः उन्नतः वृक्षम् आरोहति।

३. लक्ष्मणः रामं वदसि।

5. **द्वयोः रूपाणि सर्वपुरुषवचनेषु लिखत।** 6

१. अभवत् २. मोदते ३. गच्छेत्

6. **संस्कृतवाक्ये योजयत।** 4

१. आगत्य २. साकम ३. इव ४. कृतवान्

7. **सर्वविभक्तिवचनेषु लिखत। (एकमेव)** 4

१. गुरु २. इदम् (स्त्री)

8. **वाक्यमेकं विवृणुत।** 2

१. गतं न चिन्तयेत् प्राज्ञः। २. नास्ति मातृ समो बन्धुः।

Scanned by CamScanner

**9. स्त्रीलिङ्गरूपं लिखत।** **3**

१. कृतवान्  २. पचन्  ३. भीत:

**10. एकस्य व्याकरणविशेषं लिखत।** **2**

१. गुरुभ्यो नम:  २. हरये कुप्यति

**11. मातृभाषया अनुवदत** **5**

१. उन्नता: नारिकेलवृक्षा: आरामेषु रोहन्ति।

२. पण्डित: ग्रन्थानां रचनया अजीवत्।

३. धेनो: आहार: अल्पमूल्य: सुलभश्च भवति।

४. शीघ्रं गच्छन्तं मित्रं दृष्ट्वा अहम् अपि अधावम्

५. माता पर्वदिने मधुरं भक्ष्यं कृतवती।

**12. संस्कृतभाषायाम् अनुवदत** **5**

1. Rama entered Ayodhya with Sita.
   ರಾಮನು ಸೀತೆಯೊಡನೆ ಅಯೋಧ್ಯೆಯನ್ನು ಪ್ರವೇಶಿಸಿದನು.
2. **Ganga river flows from the Himalayas.**
   **ಗಂಗಾನದಿಯು ಹಿಮಾಲಯದಿಂದ ಹರಿಯುತ್ತದೆ.**
3. Friends, when did you come from the village?
   ಸ್ನೇಹಿತರೆ, ನೀವು ಯಾವಾಗ ಹಳ್ಳಿಯಿಂದ ಬಂದಿರಿ ?
4. **Dark clouds move in the sky.**
   **ಕಪ್ಪಾದಮೋಡಗಳು ಆಕಾಶದಲ್ಲಿ ತೇಲುತ್ತವೆ.**
5. Having ascended the chariot, the soldier moved forward.
   ರಥವನ್ನು ಏರಿ ಸೈನಿಕನು ಮುಂದೆ ಹೊರಟನು.

-------------

Scanned by CamScanner